# संस्कृतवार्ताः

दिनाङ्क :-19.10.2024

प्रातः - 06:55

अथ वार्ताः

## राष्ट्रपति मलावीयात्रा

राष्ट्रपतिः द्रौपदीमुर्मुः अफ्रीकीय-राष्ट्राणां त्रिदिवसीय-प्रवासस्य अन्तिमे दिवसे अद्य मलावीदेशस्य सांस्कृतिकस्थलानां भ्रमणं करिष्यति। ह्यः राष्ट्रपतिना स्वीयेन समकक्षेण लाजरस-चकवेरा इत्यमुना साकं द्विपक्षीयोपवेशानि विहितानि। अत्रावसरे भारत-मलावी-देशाभ्यां प्रतिनिधि-मण्डलस्तरीयायाः वार्तायाः अनन्तरं विभिन्नेषु क्षेत्रेषु सहयोगस्य चतुर्षु सहभागिताज्ञापन-पत्रेष्वपि हस्ताक्षरं जातम्। राष्ट्रपतिः द्रौपदी मुर्मुः मलावीदेशे एकं स्थायीकृत्रिम-अङ्ग-प्रतिस्थापन-केन्द्रम् उद्घाटयितुं घोषणामपि कृतवती। अद्य राष्ट्रपतिः श्री राधाकृष्ण मन्दिरं प्रसिद्धं मलावी-सरोवरं च प्रति यास्यति। तदनन्तरं राष्ट्रपतिः अल्जीरिया-मॉरिटानिया-मलावी-देशानाम् आसप्तापर्यन्तं प्रचलितानां त्रयाणां राष्ट्राणां यात्रानन्तरं नवदिल्लीं प्रति प्रस्थास्यति।

## प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्लयां कर्मयोगी-सप्ताह-राष्ट्रिय-शिक्षण-सप्ताहस्य इत्यस्य आरम्भः करिष्यते। सप्ताहावधौ, प्रत्येकं कर्मयोगी न्यूनातिन्यूनं चतसृणाम् होरासां सक्षमता-सम्बद्ध-शिक्षणं प्राप्तुं प्रतिज्ञां करिष्यति।

## पीएम-रूसः

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य द्वाविंशति-दिनाङ्कात् रूसदेशस्य द्विदिवसीययात्रायां भविष्यति। यत्र असौ षोडशतमे ब्राजील्-रूस-भारत-चीन-दक्षिण-अफ्रिकादेशानां ब्रिक्स इति शिखरसम्मेलने भागं ग्रहिष्यति। कजाननगरे आयोक्ष्यमाणस्य शिखरसम्मेलनस्य विषयः न्यायपूर्णवैश्विकविकासस्य सुरक्षायाश्च सुदृढीकरणं

अस्ति इति। सम्मेलनमिदं नेतॄन् प्रमुखवैश्विकविषयेषु चर्चां कर्तुं महत्त्वपूर्णं मञ्चं प्रदास्यति। ब्रिक्स-इत्यनेन समारब्धानां उपक्रमाणाम् प्रगतेः समाकलनाय भविष्ये सहकार्यस्य सम्भाव्यक्षेत्रान् अन्वेष्टुं च बहुमूल्यं अवसरं प्रदास्यते। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् प्रधानमन्त्री मोदी यात्राकाले ब्रिक्ससदस्यदेशैः स्वसमकक्षैः च सह द्विपक्षीयोपवेशनं अपि करिष्यति इत्यपेक्षास्ति।

उपराष्ट्रपतिः

उपराष्ट्रपतिः जगदीपधनखडः अद्य राजस्थानस्य सीकरजनपदस्य एकदिवसीय-भ्रमणार्थं प्रस्थास्यति। यात्रावधौ उपराष्ट्रपतिः सीकरक्षेत्रे साभासरिया-ग्रुप-ऑफ-इस्टीट्यूशन्स-इत्येतस्य रजत-जयन्ती-वार्षिक-समारोहे मुख्यातिथित्वेन अध्यक्षतां करिष्यति।

कृषिमन्त्री

केन्द्रीयकृषिकृषककल्याणमन्त्री शिवराज-सिंह-चौहानः अद्य नवदिल्ल्यां शीतकालिक-सस्यानां कृते कृष्याधारितस्य एक-दिवसात्मकस्य राष्ट्रियकृषि-सम्मेलनस्य उद्घाटनं करिष्यति। एतस्मिन् कार्यक्रमे केन्द्रीयकृषिकृषककल्याण-राज्यमन्त्री रामनाथठाकुरोऽपि उपस्थितो भविष्यति। अस्य सम्मेलनस्य उद्देश्यं-कृषिपद्धतिषु सहयोग-नवाचारयोः संवर्धनमिति। येन हि समेषां हितधारकाणां कृते सफल-शीतकालिक-सस्याभियानं सुनिश्चितं स्यादिति।

झारखण्ड निर्वाचनम्

झाारखण्ड-विधानसभा-निर्वाचनाय राष्ट्रिय-जनतान्त्रिक-संयुतेः सहयोगिदलानां कृते आसनविभाजनस्य घोषणा जाता। राज्ये निर्वाचनस्य सह प्रभारी हिमन्तबिस्वा-सरमा इत्येषः रांचीनगरे उक्तवान् यत् भाजपेतिदलं अष्टषष्टिः आजसूदलं दश जनतादल-यूनाइटेइति द्वि चिरागपासवानस्य एलजेपीदलं एकं च विधानसभासनेषु निर्वाचनं करिष्यन्ति इति।

लेबनान सहायता

भारतेन लेबनानदेशाय त्रयस्त्रिंशत्-टनमितायाः खाद्यपूर्तेः रूपेण मानवीय साहाय्यं प्रेषितम्। ह्यः एकादशटनमितं यावत् चिकित्सापूर्तिः सम्प्रेषिता। यस्मिन् हृदयरोगसम्बद्धाः अनेके औषधयः सम्मिलिताः सन्ति। विदेशमन्त्रालयेन ज्ञापितं यत् साहाय्यमिदं एफ्.आई.पी.आई.सी इत्येतस्य तृतीये शिखरसम्मेलने भारतेन कृतप्रतिबद्धतां प्रकटयति।

क्रिकेट

क्रिकेटप्रतिस्पर्धायां भारतमद्य प्रातः बेङ्गलुरुनगरे प्रथमायाः क्रिकेट-निकषस्पर्धायाः चतुर्थे दिने न्यूजीलैण्डदलं विरुध्य एकत्रिंशदधिकद्विशतं धावनाङ्केषु स्वकीयं द्वितीयं द्वन्द्वं क्रीडिष्यति।